श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चमः सर्गः ॥

## सुकेशसन्ततीनां माल्यवत्सुमालिमालिनां सन्तानस्य वर्णनम्

सुकेशं धार्मिकं दृष्ट्वा वरलब्धं च राक्षसम्।
ग्रामणीर्नाम गन्धर्वो विश्वावसुसमप्रभः॥ **7.5.1** ॥

तस्य देववती नाम द्वितीया श्रीरिवात्मजा।
त्रिषु लोकेषु विख्याता रूपयौवनशालिनी॥ **7.5.2** ॥

तां सुकेशाय धर्मात्मा ददौ रक्षःश्रियं यथा।
वरदानकृतैश्वर्यं सा तं प्राप्य पतिं प्रियम्॥ **7.5.3** ॥

आसीद् देववती तुष्टा धनं प्राप्येव निर्धनः।
स तया सह संयुक्तो रराज रजनीचरः॥ **7.5.4** ॥

अञ्जनादभिनिष्क्रान्तः करेण्वेव महागजः।
ततः काले सुकेशस्तु जनयामास राघव॥ **7.5.5** ॥

त्रीन् पुत्राञ्जनयामास त्रेताग्निसमविग्रहान्।
माल्यवन्तं सुमालिं च मालिं च बलिनां वरम्॥ **7.5.6** ॥

त्रींस्त्रिनेत्रसमान् पुत्रान् राक्षसान् राक्षसाधिपः।
त्रयो लोका इवाव्यग्राः स्थितास्त्रय इवाग्नयः॥ **7.5.7** ॥

त्रयो मन्त्रा इवात्युग्रास्त्रयो घोरा इवामयाः।
त्रयः सुकेशस्य सुतास्त्रेताग्निसमतेजसः॥ **7.5.8** ॥

विवृद्धिमगमंस्तत्र व्याधयोपेक्षिता इव।
वरप्राप्तिं पितुस्ते तु ज्ञात्वैश्वर्यं तपोबलात्॥ **7.5.9** ॥

तपस्तप्तुं गता मेरुं भ्रातरः कृतनिश्चयाः।
प्रगृह्य नियमान् घोरान् राक्षसा नृपसत्तम॥ **7.5.10** ॥

विचेरुस्ते तपो घोरं सर्वभूतभयावहम्।
सत्यार्जवशमोपेतैस्तपोभिर्भुवि दुर्लभैः॥ **7.5.11** ॥

सन्तापयन्तस्त्रीन् लोकान् सदेवासुरमानुषान्।
ततो विभुश्चतुर्वक्त्रो विमानवरमाश्रितः॥ **7.5.12** ॥

सुकेशपुत्रानामन्त्र्य वरदोऽस्मीत्यभाषत।
ब्रह्माणं वरदं ज्ञात्वा सेन्द्रैर्देवगणैर्वृतम्॥ **7.5.13** ॥

ऊचुः प्राञ्जलयः सर्वे वेपमाना इव द्रुमाः।
तपसाऽऽराधितो देव यदि नो दिशसे वरम्॥ **7.5.14** ॥

अजेयाः शत्रुहन्तारस्तथैव चिरजीविनः।
प्रभविष्णवो भवामेति परस्परमनुव्रताः॥ **7.5.15** ॥

एवं भविष्यथेत्युक्त्वा सुकेशतनयान् विभुः।
स ययौ ब्रह्मलोकाय ब्रह्मा ब्राह्मणवत्सलः॥ **7.5.16** ॥

वरं लब्ध्वा तु ते सर्वे राम रात्रिञ्चरास्तदा।
सुरासुरान् प्रबाधन्ते वरदानसुनिर्भयाः॥ **7.5.17** ॥

तैर्बाध्यमानास्त्रिदशाः सर्षिसङ्घाः सचारणाः।
त्रातारं नाधिगच्छन्ति निरयस्था यथा नराः॥ **7.5.18** ॥

अथ ते विश्वकर्माणं शिल्पिनां वरमव्ययम्।
ऊचुः समेत्य संहृष्टा राक्षसा रघुसत्तम॥ **7.5.19** ॥

ओजस्तेजोबलवतां महतामात्मतेजसा।
गृहकर्ता भवानेव देवानां हृदयेप्सितम्॥ **7.5.20** ॥

अस्माकमपि तावत् त्वं गृहं कुरु महामते।
हिमवन्तमुपाश्रित्य मेरुं मन्दरमेव वा॥ **7.5.21** ॥

महेश्वरगृहप्रख्यं गृहं नः क्रियतां महत्।
विश्वकर्मा ततस्तेषां राक्षसानां महाभुजः॥ **7.5.22** ॥

निवासं कथयामास शक्रस्येवामरावतीम्।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः॥ **7.5.23** ॥

सुवेल इति चाप्यन्यो द्वितीयो राक्षसेश्वराः।
शिखरे तस्य शैलस्य मध्यमेऽम्बुदसन्निभे॥ **7.5.24** ॥

शकुनैरपि दुष्प्रापे टङ्कच्छिन्नचतुर्दिशि।
त्रिंशद्योजनविस्तीर्णा शतयोजनमायता॥ **7.5.25** ॥

स्वर्णप्राकारसंवीता हेमतोरणसंवृता।
मया लङ्केति नगरी शक्राज्ञप्तेन निर्मिता॥ **7.5.26** ॥

तस्यां वसत दुर्धर्षा यूयं राक्षसपुङ्गवाः।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः॥ **7.5.27** ॥

लङ्कादुर्गं समासाद्य राक्षसैर्बहुभिर्वृताः।
भविष्यथ दुराधर्षाः शत्रूणां शत्रुसूदनाः॥ **7.5.28** ॥

विश्वकर्मवचः श्रुत्वा ततस्ते राक्षसोत्तमाः।
सहस्रानुचरा भूत्वा गत्वा तामवसन् पुरीम्॥ **7.5.29** ॥

दृढप्राकारपरिखां हैमैर्गृहशतैर्वृताम्।
लङ्कामवाप्य ते हृष्टा न्यवसन् रजनीचराः॥ **7.5.30** ॥

एतस्मिन्नेव काले तु यथाकामं च राघव।
नर्मदा नाम गन्धर्वी बभूव रघुनन्दन॥ **7.5.31** ॥

तस्याः कन्यात्रयं ह्यासीद्धीश्रीकीर्तिसमद्युति।
ज्येष्ठक्रमेण सा तेषां राक्षसानामराक्षसी॥ **7.5.32** ॥

कन्यास्ताः प्रददौ हृष्टा पूर्णचन्द्रनिभाननाः।
त्रयाणां राक्षसेन्द्राणां तिस्रो गन्धर्वकन्यकाः॥ **7.5.33** ॥

दत्ता मात्रा महाभागा नक्षत्रे भगदैवते।
कृतदारास्तु ते राम सुकेशतनयास्तदा॥ **7.5.34** ॥

चिक्रीडुः सह भार्याभिरप्सरोभिरिवामराः।
ततो माल्यवतो भार्या सुन्दरी नाम सुन्दरी॥ **7.5.35** ॥

स तस्यां जनयामास यदपत्यं निबोध तत्।
वज्रमुष्टिर्विरूपाक्षो दुर्मुखश्चैव राक्षसः॥ **7.5.36** ॥

सुप्तघ्नो यज्ञकोपश्च मत्तोन्मत्तौ तथैव च।
अनला चाभवत् कन्या सुन्दर्यां राम सुन्दरी॥ **7.5.37** ॥

सुमालिनोऽपि भार्याऽऽसीत् पूर्णचन्द्रनिभानना।
नाम्ना केतुमती राम प्राणेभ्योऽपि गरीयसी॥ **7.5.38** ॥

सुमाली जनयामास यदपत्यं निशाचरः।
केतुमत्यां महाराज तन्निबोधानुपूर्वशः॥ **7.5.39** ॥

प्रहस्तोऽकम्पनश्चैव विकटः कालिकामुखः।
धूम्राक्षश्चैव दण्डश्च सुपार्श्वश्च महाबलः॥ **7.5.40** ॥

संह्रादिः प्रघसश्चैव भासकर्णश्च राक्षसः।
राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिताः ॥ **7.5.41** ॥

कुम्भीनसी च इत्येते सुमालेः प्रसवाः स्मृताः ॥ **7.5.42** ॥

मालेस्तु वसुदा नाम गन्धर्वी रूपशालिनी।
भार्यासीत् पद्मपत्राक्षी स्वक्षी यक्षीवरोपमा ॥ **7.5.43** ॥

सुमालेरनुजस्तस्यां जनयामास यत् प्रभो।
अपत्यं कथ्यमानं तु मया त्वं शृणु राघव ॥ **7.5.44** ॥

अनलश्चानिलश्चैव हरः सम्पातिरेव च।
एते विभीषणामात्या मालेयास्ते निशाचराः ॥ **7.5.45** ॥

ततस्तु ते राक्षसपुङ्गवास्त्रयो
निशाचरैः पुत्रशतैश्च संवृताः।
सुरान् सहेन्द्रानृषिनागयक्षान्
बबाधिरे तान् बहुवीर्यदर्पिताः ॥ **7.5.46** ॥

जगद्भ्रमन्तोऽनिलवद् दुरासदा
रणेषु मृत्युप्रतिमानतेजसः।
वरप्रदानादपि गर्विता भृशं
क्रतुक्रियाणां प्रशमङ्कराः सदा ॥ **7.5.47** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चमः सर्गः ॥